# Mantrabhajanadinirupanam

# मन्त्रभजनादिनिरूपणम्

## Document Information

Text title : Mantrabhajanadinirupanam

File name : mantrabhajanAdinirUpaNam.itx

Category : misc, lakShmInArAyaNIyasaMhitA, mantra

Location : doc_z_misc_general

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 143/100-111||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# मन्त्रभजनादिनिरूपणम्

अर्थं कामं चेहमानाः प्रजा ह्रासं व्रजन्त्यपि ।
तत्र मन्त्रं जपेन्मे च गायत्र्याख्यं निरन्तरम् ॥ १०० ॥

“ॐ भूर्भुवः स्वः, श्रीघनश्यामाय विद्महे ।
नीलकण्ठाय धीमहि, तन्नो हरिः प्रचोदयात्” ॥ १०१ ॥

“ॐ भूर्भुवः स्वः, श्रीबालकृष्णाय विद्महे ।
अनादिकृष्णाय धीमहि, तन्नः कृष्णः प्रचोदयात्” ॥ १०२ ॥

“ॐ भूर्भुवः स्वः, श्रीनाराणाय विद्महे ।
वासुदेवाय धीमहि, तन्नो विष्णुः प्रचोदयात्” ॥ १०३ ॥

“ॐ श्रीब्रह्मप्रियावल्लभाय स्वाहा नमः” जपेत् ।
“ॐश्रीहरिप्रियावल्लभाय नमः” जपेत् तथा ॥ १०४ ॥

षट्लक्षजपकर्ता वै तरत्येव भवार्णवात् ।
द्वापरे मन्त्रमेनं वै ततो जपेत् प्रमुक्तये ॥ १०५ ॥

“अनादिश्रीकृष्णनारायण कृष्ण श्रियःपते ।
राधापते परब्रह्म गोपीपते जयापते ॥ १०६ ॥

ललिताश्रीपते प्रज्ञापते पद्मावतीपते ।
सुखदाश्रीपते लक्ष्मीपते श्रीमाणिकीपते ॥ १०७ ॥

हंसगरुडवारणतुरगाधिपते प्रभो ।
सताम्पते सतीसाध्वीपते सर्वपते विभो ॥ १०८ ॥

भगवन् पुण्डरीकाक्ष तारयाऽस्मान् भवार्णवात् ।
द्वापराद्धोररूपाद्वै चान्तिमसमयात्मकात्” ॥ १०९ ॥

इत्यर्थयेद्भगवन्तं परमेशं सनातनम् ।
पूजयेन्मां धारयेच्च हृदये मयि चार्पयेत् ॥ ११० ॥

एवं मोक्षं द्वापरेऽन्ते चाप्नुयुर्मानवा रमे ।
पठनाच्छ्रवणाच्चापि संहिताया ममापि च ॥ १११॥

इति श्रीलक्ष्मीनारायणीयसंहितायाः द्वापरयुगसन्तानात्मकस्य तृतीयखण्डे
१४२-अध्यायान्तर्गतं द्वापरयुगे धर्मार्थादिमोक्षप्राप्त्यर्थं
मन्त्रभजनादिनिरूपणं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड ३। अध्याय १४३/१००-१११॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 143/100-111..

Proofread by PSA Easwaran

---

*Mantrabhajanadinirupanam*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*